श्री.८.७

वेदान्त

2478

४६४/९५

भगवद्गीता शांकरभाष्य

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

१०

॥ भगवद्गीताशंकरभाष्य॥

२३

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

॥ ॥ ॐ नमः श्रीकृष्णाय ॥ धृतराष्ट्र उवाच ॥ ॥धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः। मामकाः पांडवाश्चैव किम
कुर्वत संजय ॥१॥ ॥इह खलु सकललोकहितावतारः परमकारुणिको भगवान् देवकीनंदनः तत्त्व
ज्ञानविजृंभितशोकमोहविध्वंसिना विवेकतया निजधर्मत्यागपरधर्माभिसंधिपरं अर्जुनं धर्मज्ञानरहस्यो
पदेशप्लवेन तस्माच्छोकमोहसागरादुद्दधार। तमेवं भगवदुपदिष्टं द्वैपायनः सप्तभिः श्लोकशतैरुपनिब
बंध॥ तत्र तावत् धर्मक्षेत्र इत्यादिना विषीदन्निदमब्रवीदित्यंतेन ग्रंथेन श्रीकृष्णार्जुनसंवादप्रस्तावकथा
निरूप्यते। ततः परमासमाप्तेस्तयोर्धर्मज्ञानार्थसंवादः। तत्र धर्मक्षेत्र इत्यनेन श्लोकेन धृतराष्ट्रेण हस्तिनापु
रस्थितं स्वसारथिं समीपस्थं संजयं प्रति कुरुक्षेत्रे वृत्तांते पृष्टे। संयो हस्तिनपुरस्थितोपि व्यासप्रसादा
ल्लब्धदिव्यचक्षुः कुरुक्षेत्रवृत्तांतं साक्षात्पश्यन् धृतराष्ट्राय निवेदयामास दृष्ट्वा तु पांडवानीकमित्या १
दिना। हे संजय मामका दुर्योधनादयःश्चापरः पांडवाः युयुत्सवः योद्धुकामाः धर्मक्षेत्रे धर्मस्य सवर्गो

(2A)

कुरुक्षेत्रेसमवेतामिलिताःसंतःकिंअकुर्वत।किंविदधुः॥१॥ ॥संजयउवाच॥दृष्ट्वातुपांडवानीकंव्यूढंदु
र्योधनस्तदा।आचार्यमुपसंगम्यराजावचनमब्रवीत्॥२॥ ॥तुपुनस्तदातस्मिन्मिलितेषुसत्सुराजादुर्योध
नअनेकवीरसमुपदायेलक्षदीक्षिदुःखेनबोधयितुंअशक्यंआचार्यंधनुर्वेदोपादेष्टारंद्रोणंउपसंगम्य
आधिक्येनआचार्यंवृत्तेनसंगम्यसंगतोभूत्वावचनंअनंतरंउच्यमानंअब्रवीत्।उक्तवान्।किंतत्वापां
डवानीकंपांडवानांयुधिष्ठिरादीनांअनीकंसैन्यंव्यूढंचक्रादिव्यूहरचनयासंपन्नंदृष्ट्वाअवलोक्य॥२॥
॥दुर्योधनःद्रोणंप्रतियद्वचःअवोचत्तदेवभवतिश्लोकैःसंजयःधृतराष्ट्रंप्रत्याह॥३॥ ॥प
पश्यैतांपांडुपुत्राणामाचार्यमहतींचमूं।व्यूढांद्रुपदपुत्रेणतवशिष्येणधीमता॥ ॥हेआचार्यपश्यै
तांपांडुपुत्राणांमहतींसप्ताक्षौहिणीपरिमितांचमूंसेनांपश्य॥अवलोकय।कथंभूतांतवशिष्ये
णद्रुपदपुत्रेणधृष्टद्युम्नेनधीमतातवशिष्य[illegible]त्वेनसेनाव्यूहविन्यासादिबुद्धिमताव्यूढांव्यूहविन्या

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai"

तेनस्थापितां। तवशिष्येणेतितदापिपांडवसेनायांकश्चिदनुरागोस्तीतिकौटिल्यवचनंदुर्योधनस्येति॥पां
(3) डुःपांडुरोधर्मंतत्पुत्राजारपुत्राइतिसाभिप्रायंवचनंदुर्योधनस्य॥३॥ ॥अत्रशूरामहेष्वासाभीमार्जुन
समायुधि।युयुधानोविराटश्चद्रुपदश्चमहारथः॥४॥ ॥अत्रअस्यांच म्वांअमीशूराःशौर्य
णक्षात्रधर्मेणउपेताःमहेष्वासाःइषवःअस्यंतेयैस्तानिधनूंषिमहांतियेषांतेमहेष्वासाः।युधिसंग्रामे
भीमार्जुनसमाः।भीमःभियात्रायनमीयतइति[watermark]रववीरांतारेःविलोक्यतइतिभीमः।अर्जुनःप
शुपतिसंग्रामोपार्जितयशोविभूतिभिःअर्जुनंपांडुरंसंपादितंविश्वंयेनसोयमर्जुनः।ताभ्यांसमास्तु
ल्याः।युयुधानवीरवरैरेवमिश्रीभावेनयुध्याविष्टःयुमिश्रणइतिधातुपाठात्।विराटःविगतःविपद्भ्य
२ भूतोराट्राजायस्यभ्रातुःस्यंदनस्यसविराट्।द्रुपदःद्रुवत्दृढवत्संग्रामेनिश्चलौपादौयस्यसद्रुपदः २
महारथःप्रत्येकंमहारथत्वेविशेषणं।युयुधानोमहारथइत्यादि॥४॥ ॥धृष्टकेतुश्चेकितानःकाशि

(3A)

राजश्चवीर्यवान् ॥ पुरुजित्कुंतिभोजश्चशैब्यश्चनरपुंगवः ॥५॥ ॥धृष्टकेतुः धृष्टः प्रगल्भः शत्रुविनाससमन्
केतुश्चिन्हंध्वजादिर्यस्य ॥ धृष्टानां रणेप्रगल्भानां केतुर्विनाशक इति वा धृष्टकेतुः ॥ चेकितानः संग्रामकुशलः ॥
काशिराजः काशो ब्रह्मतत्त्वप्रकाशः यस्यां निवसतां स्थलनः सा काशी तस्या राजा स काशीराजः ॥ विरिपुस वि
जयी ॥ शैब्यः संग्रामविजयार्हः ॥५ ६॥ युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् ॥ सौभद्रो द्रौपदेयाश्च
सर्वएवमहारथाः ॥६॥ ॥युधामन्युः च अपर विक्रांतः वीर्यवान् ॥ उत्तमौजाः ॥ सौभद्रः च अपरं द्रौपदेयाः
द्रौपद्यास्तनयाः ॥ एते सर्वे महारथाः ॥ एवमेते महत्युद्धे सहाय असमंतात् रथः शस्त्रास्त्रादिसंहितार
थ्यो येषां ते महारथाः ॥६॥ ॥अस्माकंतु विशिष्टा ये तान्निबोध द्विजोत्तम ॥ नायका मम सैन्यस्य संज्ञा
र्थं तान्ब्रवीमि ते ॥७॥ ॥हे द्विजोत्तम तु पुनः ये अस्माकं धार्त्तराष्ट्राणां विशिष्टाः पांडवसेनावीरेभ्योपि
श्रेष्ठाः ॥ तान् निबोध अवधारय ॥ मम सैन्यस्य नायकाः नेतारः तान् ते तुभ्यं संज्ञार्थं अभिज्ञानार्थं ब्र

श्री

(५) वीमि कथयामि॥७॥ भवान् भीष्मश्च कर्णश्च कृपश्च समितिंजयः। अश्वत्थामा विकर्णश्च सोमदत्तस्तथैव च
॥८॥ ॥भवान् त्वमेव तावत् यस्य तव युधकौशलोपदेशान् भगवान् पशुपतिरर्जुनेन निर्जितः स त्वं। भीष्म
सकलक्षत्रक्षयकारि चक्रायुधलीलावतार परशुरामस्यापि रणे भयंकरत्वात् भीष्मः। कर्णः वैरिणां कृ
र्तनात् कर्णः। कृपः शत्रुहिंसनशीलत्वात् कृपधातुः हिंसार्थी। अश्नुते व्याप्नोति अश्नाति वैरिणो भक्षयति वा अ
श्वा वा तिख्यातिं च गच्छतीति यशस्थाम्ना बलेन तत्र अश्वत्थामा वपुष्ययां तो वा अश्वशब्दः तन्नादः शब्दः स्थाम बलं
यस्य सोऽश्वत्थामा स किल सकललोकोपसंहारदक्षस्य दाक्षायणीपतेर्लीलावतारो यस्मात्। विकर्णयि
स्य अ समानवीरसंग्रामोपार्जितकीर्तिमंजरीवर्णनायां श्रव्यर्थिनः पार्थिवा विगतकर्णा वधिरा इवे उद्भिनं त
3 क्रोन्निर्वंतीति विकर्णः। पार्वतीपतिदत्तवर सोमदत्तः। तथैव च भगवान् भीष्मश्च त्रिलोकापराजयदक्ष 3
मौ तथैव इतरेऽपि अर्थः॥८॥ ॥अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः। नानाशस्त्रप्रहरणाः सर्वे युद्ध

विशारदाः॥८॥ ॥चअपरंअन्येसहायत्वेनसमाहूताःभगदत्तशाल्यप्रभृतयः।बहवःशूराःमदर्थेम
मविजयसाधनार्थंत्यक्तजीविताः।सार्वेऽपियुद्धविशारदाःयुद्धकुशलाः॥९॥ सैन्यद्वयपरिकालनेनस्यप्रयो
जनमाह॥छ॥ ॥अपर्याप्तंतदस्माकंबलंभीष्माभिरक्षितं।पर्याप्तंत्विदमेतेषांबलंभीमाभिरक्षितं॥१०॥
तत्पांडवानांबलं।सैन्यंभीष्मेनसेनापतिनाअभिरक्षितंअस्माकंबलंप्रतिअपर्याप्तंअपरिपूर्णंसंस्था
यासामर्थ्येनवा।इदंतुअस्माकंतुबलं।पुनःएतेषांपांडवानांभीमाभिरक्षितंबलंप्रतिपर्याप्तंपरिपू
र्णं।युद्धे अस्माकंबलंअपर्याप्तंभीष्मस्योभयपक्षपातित्वात्।एतेषांचपर्याप्तंभीमस्यैकपक्षपाति
त्वात्इतियोजना।तदाभीष्ममेवाभिरक्षंतुवियाद्येसंगतंस्यादेतत्।तथाचभाष्यंतेरे।भीमस्यएकप
क्षपातित्वात्पांडवानांबलंसमर्थंभाति।भीष्मस्यउभयपक्षपातित्वात्अस्माकंबलंअसमर्थंभा
ति।इतिदुर्योधनस्याभिप्रायः॥छ॥ अयनेषुचसर्वेषुयथाभागमवस्थिताः।भीष्ममेवाभिरक्षं

एवा वा

भवंतः सर्वएवहि ॥११॥ ॥किंयस्मात्सर्वेऽन्नवंतो यूयं वीर्येण प्रभवंतो वीराः सार्वेषु समस्तप्रकारेषु अयनेषु

(5) च युद्धदुर्गमार्गेषु गोमूत्रिकादिव्यूहस्थलेषु सार्वेषु यथाभागं व्यूहविभागं अनतिक्रम्य अवस्थिता वर्तमानाः

संतः भीष्ममेव सेनानायकं अभितः सर्वतो रक्षंतु समव्यूहाद् दृष्ट्वा यापि पालयंतु ॥११॥ ॥द्रोणं प्रति राज्ञा भीष्म

स्य बहुमानपुरःसरं यदुक्तं तच्छ्रुत्वा भीष्मः किमकरोत् तदाह ॥ ॥तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः ॥सिंह

नादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् ॥१२॥ ॥कुरुवृद्धः पितामहो गांगेयः तस्य एवं द्रोणं प्रति निरूपणं कुर्व

तो दुर्योधनस्य राज्ञः हर्षं प्रीतिं संजनयन् सन् उच्चैः सिंहनादं विनद्य सर्वसत्वसंत्रासनं सिंहस्य नादमिव नादं

अट्टहासं कृत्वा शंखं दध्मौ आपूरितवान् प्रतापयुक्तः ॥१२॥ ॥तदेवासनापतेर्भीष्मस्य युद्धोत्सवमालक्ष्य

8 सर्वतो युद्धोत्सवः प्रवृत्तः इत्याह ॥ ॥ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः सहसैवाभ्यहन्यंत स शब्दस्तुमु ४

लोऽभवत् ॥१३॥ ॥ततः भीष्मस्य शंखपूरणानंतरं शंखाश्च अपरं भेर्यः पणवानकगोमुखाः सहसैव युद्ध

(5A)

गपदेवअन्यदन्यंतआस्फालिताःसशब्दःतुमुलःएकवस्मीविवेचनायोग्योऽभवत्॥१३॥ ॥ततःपांडवसै
न्येप्रवृत्तंयुद्धोत्सवमाह।ततश्वेतैरितिपंचभिश्लोकैः॥ ॥ततःश्वेतैर्हयैर्युक्तेमहतिस्पंदनेस्थितौ।माधवः
पांडवश्चैवदिव्यौशंखौप्रदध्मतुः॥१४॥ ॥ततोदुर्योधनसैन्यवाद्यकोलाहलानंतरंश्वेतैःशुक्लैःकैलासाचल
शिखरकल्पैःपरासैन्योत्कर्षतनूकरणसामर्थ्यवज्रिवदियैःअतिवेगातिरेकात्स्वभावतोवादेश्राकाशेयां
तीतिहयाविशिष्टाश्वास्तैर्युक्तेसंयोजितेमहतित्रिदिव्यमंडलकल्पे ल्पेज्यैस्पंदनेसंग्रामभूमिप्रद्व
णशीलेरथवारस्थितौवर्तमानौ।माधवःमायालक्ष्म्याधवःपतिर्माधवःश्रीमान्ःपांडवश्चापिअर्जुनश्चापि।दिव्यौ
दिविभवौअप्राकृतौशंखौदध्मतुःप्रकर्षेणपरकीयवाद्यकोलाहलनि[illegible]वसंपादनेनदध्मतुःआपूरितवं
तौ॥१४॥ ॥तदेवविभागेनप्रदर्शयन्नाह॥ ॥पांचजन्यंहृषीकेशोदेवदत्तंधनंजयः।पौंड्रंदध्मौमहाशंखंभी
मकर्मावृकोदरः॥१५॥ ॥हृषीकेशःहृषीकाणांइंद्रियाणांईशःअधिष्ठाताऽलीलागृहीतदेहोभगवान्विष्णुः

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(6) पांचजन्यंपंचजनाख्यादैत्यदेहोद्भवं।धनंजयःदेवदत्तं।वृकोदरःभीमकर्मामहाशंखंपौंड्रंदध्मौ।आपूरितवान्।
१५॥ ॥अनंतविजयमित्यादियुग्मंसर्वश्लोकक्रिययासंबध्यते॥ ॥अनंतविजयंराजाकुंतीपुत्रोयुधिष्ठिरः॥न
कुलःसहदेवश्चसुघोषमणिपुष्पकौ॥१६॥ ॥कुंतीपुत्रोयुधिष्ठिरोराजापांडवानांस्वामीअनंतविजयंमहाशंखं नं ३
दध्मौ।यस्यआहरणात्अनंतःसंततोविजयोभवतीति।अनंतविजयः।नकुलसहदेवश्चसुघोषमणिपुष्प
कौशंखौदध्मतुः॥१६॥ ॥काश्यश्चपरमेष्वासःशिखंडीचमहारथः।धृष्टद्युम्नोविराटश्चसात्यकिश्चापराजितः॥१७
चअपरंकाश्यःकाशिराजः।परमेष्वासःपरमःश्रेष्ठःइष्वासोधनुर्यस्यसः।चपुनःशिखंडीचमहारथः।शिखंडवा
न्सकलस्तुराजस्तुराजेयचभीष्मवधार्थमुत्पन्नः।पौरुषयाश्रवायुक्तः।चअपरंधृष्टद्युम्नःविराटःसात्यकिःसए
५ वअपराजितःअर्जुनेयःएतेसार्वेपृथक्शंखान्दध्मुःवादयांचक्रुरितिपरेणसंबंधः॥१७॥ ॥द्रुपदोद्रौपदेयाश्च ५
सर्वशःपृथिवीपते।सौभद्रश्चमहाबाहुःशंखान्दध्मुःपृथक्पृथक्॥१८॥ ॥हेपृथिवीपते।द्रुपदःचअपरंद्रौ

(6A)

पदेयाः द्रौपदीपुत्राः च अपरं महाबाहुः सोभद्रः एते सर्वे शंः पृथक् प्रत्येकं शंखान् दध्मुः ॥१८॥ ॥तस्य शंखनाद
स्य धार्त्तराष्ट्रान् प्रति संजयः न्यजनकत्त्वमाह ॥ ॥स घोषो धार्त्तराष्ट्राणां हृदयानि व्यदारयत् । नभश्च पृथिवीं चै
व तुमुलो व्यनुनादयन् ॥१९॥ ॥स तुमुलो घोरः पांडवासनापातीनां शंखादिजन्यो घोषः धार्त्तराष्ट्राणां हृदया
नि व्यदारयत् । किं कुर्वन् नभः आकाशं पृथिवीं च व्यनुनादयन् प्रतिशब्दं कारयन् ॥१९॥ ॥तस्मिन् समये श्रीकृ
ष्णं प्रति अर्जुनेन यदुक्तं तत् वक्तुं निःशंको किं संजय आह ॥ ॥अथ व्यवस्थितान् दृष्ट्वा धार्त्तराष्ट्रान् कपिध्वजः ॥
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः ॥२०॥ ॥अथ शंखापूरणानंतरं कपिध्वजः पांडवः व्यवस्थितान् [illegible]
[illegible] ॥ ॥विशेषेण सोत्साहेन अवस्थिता
न् स्वशंखनादात् घोरतरादपि अपरित्रस्तान् धार्त्तराष्ट्रान् दृष्ट्वा शस्त्रसंपाते उत्साहफले च धार्त्तराष्ट्राणां प्रवृत्ते
सति धनुः उद्यम्य सज्जीकृत्य [illegible] ॥२०॥ ॥हृषीकेशं तदा वाक्यमिदमाह महीपते । सेनयोरुभयोर्मध्ये रथं स्थापय

थ्यो

(7)

मेच्युत॥२१॥ ॥हे महीपते तदा हृषीकेशं इदं वाक्यमाह। किमिति। हे अच्युत मे मम रथं उभयोः सेनयोर्मध्ये रथं स्थाप
य॥२१॥ ॥यावदेतान्निरीक्षेहं योद्धुकामानवस्थितान्। कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे॥२२॥ ॥अहं
यावत् एतान् प्रधानवीरान् योद्धुकामान् अवस्थितान् निरीक्षे निरीक्षणं पूर्वकं परीक्षणं करोमि। अस्मिन् रणस
मुद्यमे मया कैः सह योद्धव्यं युद्धं कर्तव्यमित्यर्थः॥२२॥ ॥योत्स्यमानानवेक्षेहं य एते च समागताः। धार्तराष्ट्रस्य दुर्बु
द्धेर्युद्धे प्रियचिकीर्षवः॥२३॥ ॥अहं योत्स्यमानान् योद्धुं करिष्यतः अवेक्षे निरीक्षयामि। ये एते अत्र मम तव
च समागमे दुर्बुद्धेः अविचारकारिणो धार्तराष्ट्रस्य दुर्योधनस्य युद्धे युद्धस्थले प्रियचिकीर्षवः प्रियं विजयं कर्तुकामाः
मा०३ मागताः प्रागत्भ्यात्मिरक्षणसम्यक्वीरोचितसमारंभेण आगताः। ते[illegible] विचारकारिण इत्यर्थः॥२३॥ ॥ततः किं वृत्त
मित्यपेक्षायामाह॥ ॥संजय उवाच॥ एवमुक्तो हृषीकेशो गुडाकेशेन भारत। सेनयोरुभयोर्मध्ये स्थापयित्वा ६
रथोत्तमं॥२४॥ ॥हे भारत गुडाकेशेन अर्जुनेन एवं यथा वर्णितं उक्तो हृषीकेशः उभयोः सेनयोः मध्ये रथोत्तमं

स्थापयित्वा॥२४॥ ॥भीष्मद्रोणप्रमुखतःसर्वेषांचमहीक्षितां उवाचपार्थपश्यैतान्समवेतान्कुरूनिति॥२५॥ ॥
भीष्मद्रोणयोःप्रमुखेअग्रेद्रोणाद्वाकस्मात्युद्धेपलायनादिनिमित्ता तयार्जुनोरक्षितइतिद्रोणः तथासर्वेषांचम
हीक्षितांभूमंडलाध्यक्षाणांराज्ञांयुद्धवराणांअग्रेइतिउवाचइतीतिकिंहेपार्थएतान्समवेतान्तवदुष्टश्चभीष्टान्
कुरून्पश्यैतिभगवानुवाच॥२५॥ ॥ततःकिंवृत्तमित्यतआह॥ ॥तत्रापश्यत्स्थितान्पार्थःपितृनथपितामहान्
आचार्यान्मातुलान्भ्रातृन्पुत्रान्पौत्रान्सखींस्तथा॥२६॥ ॥अथानंतरंपार्थोऽर्जुनःतत्रउभयोःसेनयोःस्थि
तान्पितृन्पिबंतिशुंबंतिलालयंतिस्नपयंतिवाअप[illegible]यानीनेपिपितुस्तान्पितृन् अत्रचपितृकल्पाःपितृव्याद
यःपितामहान्गांगेयादीन्आचार्यान्द्रोणादीन्मातुलान्मातृजन्यांसाम्यंयेषांतेमातुलाःभ्रातृन्सोदरान्पु
त्रान्पुन्नाम्नोनरकात्पितृणांत्राणान्पुत्राःतान्पौत्रान्सखीन्मित्राणिअपश्यत्॥२६॥ ॥श्वशुरान्सुहृद
श्चैवसेनयोरुभयोरपि तान्समीक्ष्यसकौंतेयःसर्वान्बंधूनवस्थितान्॥२७॥ ॥चपुनःश्वशुरान्सुहृदयश्च

a joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8)

अपश्यत्पा॥२६॥ ॥ततः किं कृतवान् अत आह॥ तानिति॥ स कौंतेयो अर्जुनः सर्वान् अविशेषेण बंधून् बंधुतां परस्परस्ने-
हपाशेनेति बंधवः तान् अवस्थितान् समीक्ष्य॥ ॥कृपया परयाविष्टो विषीदन्निदमब्रवीत्॥ दृष्ट्वेमं स्वजनं कृष्ण
युयुत्सुं समुपस्थितं॥२८॥ ॥कृपया करुणया परया अतिशयया आविष्टो युक्तः विषीदन् विशेषेण सीदन् अव-
सादिस्नानिलन्नमानः इदं अनंतरं उच्यमानं अब्रवीत् इदं किमिति॥ किमब्रवीदित्यपेक्षायामाह॥ दृष्ट्वेममित्यादिनाया-
वदध्यायपरिसमाप्तिः॥ हे कृष्ण भक्तानां संसारक्लेशं विलिखनात् कृष्णः॥ इमं स्वजनं युयुत्सुं संयोद्धुकामं संतं समु- म ५
पस्थितं इहागतं दृष्ट्वा॥२८॥ ॥सीदंति मम गात्राणि मुखं च परिशुष्यति वेपथुश्च शरीरे मे रोमहर्षश्च जायते॥२९॥
मम गात्राणि अंगानि सीदंति विशीर्णानि शिथिलानि निरुत्साहानि भवंति च पुनः मुखं परितः समंतात् शुष्यति निर्द्र-
७ वीभवति॥ मम शरीरे वेपथुश्च कंपश्च तथा रोमहर्षश्च जायते॥२९॥ ॥गांडीवं स्रंसते हस्तात् त्वक्चैव परिदह्यते ७
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः॥३०॥ मम हस्तात् गांडीवं स्रंसते अधः पतति॥ त्वक् परिदह्यते॥ आंतर

(8A)

शोकक्षालनेनसंतप्यते। च अपरंमेममनःकर्त्तव्याकर्त्तव्यबोधसाधनंमंतःकरणांभ्रमतीवभ्रमंगछति दिस्थीरणां
कर्तुंनशक्नोति। च पुनः अवस्थातुंस्थितिंकर्तुंनशक्नोमि॥३०॥ ॥निमित्तानिचपश्यामिविपरितानिकेशव॥ न
चश्रेयोनुपश्यामिहत्वास्वजनमाहवे॥३१॥ ॥हेकेशवचपुनःविपरीतानिअहितसूचकानिनिमित्तानिचिह्नानिविरू
चकानिचिह्नानिपश्यामि। च पुनः आहवेस्वजनंहत्वाश्रेयःकल्याणंनअनुपश्यामितदनंतरकालेपश्यामि॥३१॥
ननुविजयादिकंश्रेयःवर्तमानंकिंनपश्यसिइतिचेत्तत्राह॥ ॥नकांक्षेविजयंकृष्णनचराज्यंसुखानिच॥ किंनोरा
ज्येनगोविंदकिंभोगैर्जीवितेनवा॥३२॥ ॥हेकृष्णअहंविजयंविशिष्टंजयंसंग्रामेउत्कर्षेनकांक्षेनप्रार्थये
ऊ३ चपुनःराज्यंराज्ञोऽधिपत्यंसुखानिचविषयजन्यानंदप्रमोदान्नप्रार्थये। हेगोविंदनोअस्माकंराज्येनकिं॥ः
भोगैःविषयसुखैःकिंजीवितेनापिकिं गोविंदगाःनिःकृतिनिःवेदांतवाक्यैःविंद्यतेपरमार्थरूपेणलभ्यतेइति
गोविंदः॥३२॥ ॥येषामर्थेकांक्षितंनोराज्यंभोगाःसुखानिच॥ तइमेवस्थितायुद्धेप्राणांस्त्यक्त्वाधनानिच॥३३॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

येषांस्वजनानांअर्थेप्रयोजनायनोअस्माकंचपुनःसुखानिएतत्सर्वंकांक्षितंवांछितं।तइमेयुद्धेयुद्धनिमित्तंप्राणा
न्आंतरधनानिबाह्यप्राणांश्चत्यक्त्वाअवस्थिताः॥३३॥ ॥आचार्याःपितरःपुत्रास्तथैवचपितामहाः।मातुला
श्वशुराःपौत्राःस्यालाःसंबंधिनस्तथा॥३४॥ ॥आचार्याद्रोणादयोयथाव्याख्याताःपितरःपुत्रास्तथापितामहाः।
मातुलाःश्वशुराःपौत्राःस्यालाःपत्न्याभ्रातरःसंबंधिनःविवाहादिसंबंधवंतः॥३४॥ ॥यदित्वमप्याचंएतान्नहंस्य
सितर्हित्वामेवराज्यलोभेनएतेहनिष्यंति।अतस्त्वमेतान्हत्वाराज्यंभुंक्ष्वेतितत्राह॥३४॥ ॥एतान्नहंतुमिच्छा
मिघ्नतोपिमधुसूदन।अपित्रैलोक्यराज्यस्यहेतोःकिंनुमहीकृते॥३५॥ ॥हेमधुसूदनएतानाचार्यादीन्घ्न
तोपिमारयतोपित्रैलोक्यराज्यस्यापिहेतोःहंतुंनेच्छामि।महीकृतेपृथिवीराज्यार्थंपुनःकिंवक्तव्यं॥३५॥ ॥नि
निहत्यधार्तराष्ट्रान्नःकाप्रीतिःस्याज्जनार्दन।पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः॥३६॥ ॥हेजनार्दनज
नान्दैत्यविपक्षभूतान्असुरादीन्अर्दयतीतिपीडयतीतिजं।अथवाजनैःअधिकारिपुरुषैःअभ्युदयादि

८

(9A)

कं अधीनयाच्यते इति जनार्दन। हे जनार्दन। धार्त्तराष्ट्रान् निहत्य नो अस्माकं का प्रीतिः स्यात् न किंचित्सुखं स्यात्
न किमपीति। ननु आततायिनामेषां वधो विहितत्वाद्युक्तः इत्येतामाशंकां धर्मशास्त्रस्य अर्थशास्त्राद्बल
वत्त्वेन परिहरति। पापमेवेति। न केवलं इह लोके सुखं नास्ति परलोकेपि तन्नास्ति यस्मात् एतान् आततायि
नो हत्वा अस्मान्पापमेव नरकादिदुःखकारणं आश्रयेत ॥३६॥ ॥ तस्मान्नार्हा वयं हंतुं धार्त्तराष्ट्रान्स्वबांध
वान्। स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७॥ यस्मात् एतेषां हनने लोकद्वयेपि अकल्पाणमेव त
स्मात् सबांधवान् धार्त्तराष्ट्रान् हंतुं वयं अर्हा न। एतेषां वधस्य अन्याय्यत्वात्। अधर्मत्वाद्वा न केवलं अ
स्माकं पारलौकिकं सुखं न भवति। ऐहिकमपि न भवतीत्याह। स्वजनं हीति। हे माधव हि यस्मात् स्वजनं ह
त्वा वयं सुखिनः कथं स्याम ॥३७॥ ॥ ननु एवं तेषामपि बंधुवधदोषे समाने सति यथा एवं ते बंधुवधमंगीकृ
त्यापि युद्धे प्रवर्त्तंते। तथैव वयमपि प्रवर्त्तेतां। किमनेन विषादेनेत्याशंक्य अविवेकि विवेकिनोर्दनपरि गमा ४

(10)

इति॥ ३६॥ ॥यद्यप्येते न पश्यंति लोभोपहतचेतसः। कुलक्षयकृतं दोषं मित्रद्रोहे च पातकं॥ ३७॥ ॥यद्यपि एते
धार्त्तराष्ट्राः लोभोपहतचेतसः लोभः परद्रव्याद्यभिलाषस्तेनानिभ्रष्टं यं लोकद्वयं प्राणिनामिति लोभस्तेनोपहत
चेतसः निरस्तकर्त्तव्याकर्त्तव्यविवेकविज्ञानाः संतः कुलक्षयकृतं गोत्रवधनिमित्तं दोषं मित्रद्रोहे च पातकं न पश्य
ति॥ ३७॥ ॥कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुं। कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन॥ ३८॥ ॥हे जनार्द
न तथापि अस्माभिः कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्मात्पापान्निवर्तितुं कथं न ज्ञेयं न यंत्रः कर्त्तव्य इत्यर्थः॥ ३८॥
कुलक्षये कृते यो दोषः उत्पद्यते तं दर्शयति॥ ॥कुलक्षये प्रणश्यंति कुलधर्माः सनातनाः। धर्मे नष्टे कुलं कृत्स्न
मधर्मोभिभवत्युत॥ ३९॥ ॥इदानीं कुलक्षयस्य पापं प्रपंचेन नरकप्राप्तिकारणत्वं दर्शयति। कुलक्षये गोत्रपु
रुषाणां विनाशे सनातनाः पारंपर्यागताश्चिरंतनाः कुलधर्माः प्रणश्यंति। धर्मे नष्टे धार्मिष्ठे नष्टे कुलं कृत्स्नमपि कु
लं अधर्मोभिभवति। तिरस्करोतीत्यर्थः अपि अधर्मोभिभवति वा रक्षकधर्मस्याभावादित्यर्थः॥ ३९॥ ॥अधर्मोभि

(10A)

भवात्कृष्ण प्रदुष्यंति कुलस्त्रियः स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥४१॥ हे कृष्ण गोपिकामनःकर्षणशील
अधर्माभिभवात् कुलस्त्रियः विशृंखलं शोऽभवाः प्रदुष्यंति स्वैरिण्यो भवंति। तासु स्त्रीषु दुष्टासु हे वार्ष्णेय हे वृष्णिवं
शोद्भव वर्णसंकरो जायते। वर्णस्य वर्णांतरमिश्रीकरणं वर्णसंकरः॥ ॥संकरो नरकायैव कुलघ्नानां कुलस्य
च। पतंति पितरो ह्येषां लुप्तपिंडोदकक्रियाः ॥४२॥ ॥संकरः जातिसंकरः एषां कुलघ्नानां च अपरं कुलघ्नकुलस्य
नरकाय भवति। हि यस्मात् एषां कुलघ्नानां कुलहंतॄणां न केवलं तेषामेव कुलस्य च नरकाय भवति॥ किंच
एषां कुलघ्नानां स्वर्गारूढाः पितरः लुप्तपिंडोदकक्रियाः संतः नरके पतंति। पिंडादिदातॄणां विच्छेदापत्यानां अ
भावात् लुप्तपिंडोदकक्रियाश्च संतः पतंतीत्यर्थः॥४२॥ ॥उक्तं दोषं उपसंहरति दोषैरेतैरिति द्वाभ्यां॥४३॥ ॥
दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः। उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः॥४३॥ ॥एतैः धर्मनाशात्र
धर्माभिभवादिलक्षणैः वर्णसंकरकारकैः दोषैः कुलघ्नानां जातिधर्माः क्षत्रियत्वजातिप्रयुक्ता धर्माः तथा शा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com